योर्मध्येसर्वानद्योरजस्वलाः तास्कस्नाननकुर्वतवर्षेपितृतर्पणं भाद्रेश्च सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः
वन्नोदत्तिभगवानदक्षिणाशाविभूषणं तावद्गोवसानद्यःकरतोयाःप्रकीर्तिताःइति करतोयाअल्पाएकाः कात्या
यनेत्वत्रोक्तविशेषः भुपगर्जतिश्रीषाकुसरितोभवि तास्प्राप्तेष्टनस्यादपूर्णेदशवासरेइति रजोदोषश्चनत
भीरवासिनां ×याशोष× ननुतत्तीरवासिनामितिनिगमोक्तेः विशेषांतरमत्स्यपुराणे पुण्यांभसासमायोगादुष्ट

DEPARTMENT OF ARCHAEOLOGY & MUSEUMS GOVT. OF RAJASTHAN MEMORIAL

मपेयंपावनमिति भारते अपवित्रमपिप्राप्यगंगांयातिपवित्रतां रजोदुष्टनदीजलपानेप्रायश्चित्तंस्मृतिसंग्रहे कालेनभस्पृष्ट
ईस्यांश्रावंतुनवोदकं अकालेतुदशाहंस्यात्सालानाथादहर्निशमिति भविष्ये मरुद्बुसमंवापियदितिष्ठत्यरातनं नवाबु
मिश्रितंतेनतदुष्टमितिस्मरयः योगयाज्ञवल्क्यः रजोदुष्टभस्निस्नानंवर्जमयारिषुदिनेः करीषतंरजस्तेषांसद्योपाप्तिश्च
तर्पणं तथा अजागोमहिषीचैवग्रामणीचप्रसूतिका भूमेर्नवोदकंचैवदशरात्रेणशुध्यतीति क्षतन्तूतनकूपाद्यदक
मपिनवोदकं व्याघ्रपादः अभावेकूपवापीनांअनपायीपयोभवेत् रजोदुष्टेपिपयसिग्रामभोगोनदुष्यति वसिष्ठः उ
पाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यतइति अथश्रावणकृत्ये भारते श्रावणे
नियतोमासमेकभक्तेनयःक्षिपेत् यत्रतत्राभिषेकेणपूज्यतेज्ञातिवर्धनः वामनपुराणे घृतंचसोरकुंभांश्चघृतपूर्णफला
निच श्रावणश्रीधरप्रीत्यैदातव्यानिदिनेदिने इतिश्रावणकृत्यं अथभाद्रपदकृत्यं भारते श्रवणेपद्मनुयोगा
समस्कारोभवेन्नरः धनाढ्यस्फीतमरुतामश्वर्यंप्रतिपद्यते वामनपुराणे मासिभाद्रपदेदद्यात्सायंसमधृतंपयो

हृषीकेशप्रीणनार्थंलवणेसगुडोदनं इतिभाद्रपदस्नानं अथाश्विनकृत्यं यमः एतमाश्वयुजेमासिनिस्नेदयाद्दि
जातये प्रीणयित्वाश्विनौदेवौरूपभागधिजायते वामने तिलस्थालीगुडघृतभक्षदधिताम्ररसादिकं प्रीत्यर्थंपद्मनाभस्य
दद्यमाश्वयुजनरैः भारते तथैवाश्वयुजमासंएकभक्तेनयोजयेत् प्रजावान्चतुष्पुत्रश्चबान्धवान्वश्चनायते इत्याश्वि
नस्नानं अथकार्तिकस्नानं विष्णुः कार्तिकेसकलेमासिनित्यस्नायीजितेंद्रियः जपन्हविष्यंकुरुतेःसर्वपापैः
प्रमुच्यते जपश्चैतद्देवतामंत्रस्यगायत्र्यावा एतद्वशाक्षरं अरुणस्यतलंकाशीरवे वारुणस्यापंचनदेऽहरहःस्नात
स्यकार्तिके अमीतपुण्यवपुषःपुण्यभाजोतिनिर्मलाइति स्नानकालश्चाक्रूरसंहितायां कार्तिकेबृहतीर्यायोब्रह्मचर्य
रायणः स्नास्यत्यनुदितेभानौभानुजातस्यभीकृतः भानुजायमात तत्रैवस्नानमंत्रः कार्तिकेहंकरिष्यामिप्रातः
स्नानंमविधिवन्मम नंजनार्दन प्रीत्यर्थंतवदेवेशदामोदरमयासह इममंत्रंसमुच्चार्यमानीस्नायाद्वृतीनरइति
अर्घमंत्रश्चतत्रैव व्रतीनःकार्तिकमासिस्नातस्यविधिवन्मम दामोदरगृहाणार्घ्यं राधयासहितोमम स्नानेनेमि

केशसः कार्तिकेपापशोषणे गृहाणार्घ्यमयादत्तंराधयासहितोभवान् इमोमंत्रौसमुच्चार्ययोर्घ्यमंप्रयच्छति सुवर्ण
रत्नरत्नपुष्पांबुपुजाशंखेनपुण्यवान् सुवर्णरूपधिवासंकल्पादकपूर्वकं तेनदत्तोभवेत्सम्यक्सुपात्रायसुपर्वणि
ति पाद्मे तुलसीदलसंक्षीणकार्तिकेयोर्चयेद्धरिं पत्रेपत्रेमुनिश्रेष्ठमोक्षंकलभतेफलं तत्रैव कुरुक्षेत्रेकोटिगुणोमंगा
यामपितत्समः ततोधिकेपुष्करेस्याद्रेवत्यांचभागैव दुर्लभःकार्तिकोविप्रमथुरायांतुमानवैरिति स्कारेकार्तिकमा
हात्म्ये धात्रीछायांयातुकुर्योत्तिलदानंमहामुने मुक्तिंप्रयांतिपितरःप्रसादान्मधुसूदनस्य दानमाहात्म्यं वामनः
रजतंकनकंदीपामणिमुक्ताफलादिकं दामोदरस्यप्रीत्यर्थंप्रदद्यात्कार्तिकेनरः चंद्रार्कनेवषर्यंणे विप्रवेश्मनि
यादद्यात्कार्तिकमासिदीपकं अग्निष्टोमफलंतस्यप्रदद्यादितिमानवः चतुष्पथेपुरध्यासक्षालणोरसथेपुच ह
समूलेक्षुगोष्ठेषुकरतारगहनेषुच रिपदानादिसर्वत्रमहापापफलमवाप्नुयात् उच्चैःप्रदीपमाकाशेयोदद्यात्का
र्तिकेनरः सर्वकुलंसमुध्दृत्यविष्णुलोकमवाप्नुयादिति मंत्रोपितत्रैव दामोदरायनमस्तुलयातेमयासह

प्ररीपंतप्रयच्छामिनमोनंतायवेधसरति स्कांदे प्ररीपमालांयःकुर्यात्कार्तिकेमासिवैष्णव अवसानेषुदीपानांब्राह्मणान्
भोजयेच्छुचिः गारुडेसरूपंतदीप्तंतेवरविर्यथेति भारते कार्तिकेतुनरोमांसंयःकुर्याद्दकभोजनं अरश्चवरुचीर्य
श्चकीर्तिमांश्चैवजायते काशीखंडे लक्षंघाचातिरुद्रंवाप्राजापत्यमथापिवा सप्राप्नोतिकार्तिकेमासिकृपोऽत्रसंशयः
एषवान एकांतरव्रतंकुर्यात्त्रिरात्रव्रतमेववा पंचरात्रंसप्तरात्रंसप्रापकार्तिकेव्रती पक्षव्रतवाकृच्छ्रंतमासोपो
षणमेववा चरेद्यावान्नाहारंवासप्राप्नोतिकार्तिकेव्रती अस्तंयंचरेद्भानुरफलव्रतमाप्नुयात् पत्रभोजीभवेद्भानोस्य
त्यात्प्रयत्नतः कांस्यस्थंनियमेदघात्कास्यसर्पिःप्रपूरितं नारदीय कार्तिकेवर्जयेत्कास्यंकार्तिकेऋक्षसंधित
ऋक्षेपर्युषितं संधितंलवणंशाकः पाके राजिकमादकंचैवनेयाद्यात्कार्तिकव्रती दिरलंतिलतलवात्धान्य
न्मतिदूषितं दिरलंतु माषसुरूमसराश्चचणकाश्चकुलत्थका निष्पावाराजमाषाश्चश्राद्धक्षोदिरलंस्मृत
मितिस्कांदाक्षे भारते कार्तिकेवर्जयेन्मांसकार्तिकेवर्जयेन्मधुमिति काशिखंडे मधुत्यागेशतंदद्यात्सायसंचस

र्करं मासाशियोपियोभूपासनेयुस्तेपिकार्तिके नियमेमत्स्यमांसानांप्रदात्कार्तिकेव्रती कूष्माडानिविशेषानिदशस्वर्ण
पुतान्यपि कार्तिकेमौनसोजीयःसोश्नात्युप्तमवहि स्कंदेसतिलोमौनीसहिरण्यांप्रदापयेत् कार्तिकेलवणंत्यक्तेयेनभुक्तास्त
ता त्यक्ताःसर्वरसास्तेनतत्सागीगंप्रदापयेत् भूशय्यांकार्तिकेकुर्वन्नभवंसंस्पृशेद्भुवी पर्यंकंभूषणैर्दद्यात्सत्कलेसोपधानक
मर्वचातुर्मास्यव्रतान्यपिचतुर्थंसं भवेत्कार्तिकएवकार्याणियथावत्तत्रैव चतुष्पिचमासेषुनसामार्थ्येव्रतेयदि तदार्द्रव्रतिना
भाव्यमप्यब्फलमिछतेति अथभिष्मपंचकं कार्तिकेभक्त्यग्रासे एकादश्यांतुशुक्लायाव्रतंपंचदिनात्मकं व्रतीस्नात्वादि
धानेनमध्याह्नेतुतथापुनः अत्रस्नातमध्याह्नचन्द्रोमयाभ्यांस्नात्वादेवर्षिपितृसंतर्पविष्णुपंचामृतपंचगव्यैःसंस्नाप्यकर्पू
रकस्तूरीकुंकुमचंदनैरनुलिप्यपुष्पैरभ्यर्च्यधूपयित्वापंचाह्निकमनवरतदीपंप्रज्वाल्यहविष्यान्नंनिवेदयसायंस
ध्यामुपास्यमूलमंत्रंजपेत् तत्रपंचसुदिनेषुविशेषः भाद्रेपद्मैःपादावर्जयेत्द्वितीयेबिल्वपत्रैर्जानुनी तृतीयेभानामितु
लसीपत्रैः चतुर्थेजातीपुष्पादिभिःस्कंधौ पंचममालतीपुष्पैःशिरः तथा पंचस्वपिदिनेषुघृतान्नं सत्यव्रतायश्च

येगोगेयायमहात्मने भीष्मायचदद्म्यर्घ्यमाजन्मब्रह्मचारिणे वसूनामवतारायशांतनोरात्मजायच अर्घ्यंददामिभीष्मायसो
मवंशायच वैय्याघ्रपादगोत्रायसांकृत्यप्रवरायच गंगापुत्रायभीष्मायप्रदास्येहंतिलोदकं अपुत्रायददाम्येतत्सलिलंभीष्मत
र्पणंस्यैतंमंत्रंभीष्मंसतर्पयेगोमयगोमूत्रदुग्धदधिघृतानिक्रमेणपंचस्कंदिनेषुविक्षेत् एवंपंचदिनान्युपोष्यषष्ठदिनेविधि
वत्स्नात्वापक्वोल्लनपंचब्राह्मणान्संभोज्यवंधुभिःसहरात्रौभुंजीत अष्टमेचैकादश्यांस्कंदाहादश्यांवस्त्रत्रयादश्यांगोभ्यतुर्दश्यां
घृतपायसंपौर्णमास्यांश्वेलस्नानंतिलावस्त्रंचदद्यं मैथुनान्नतवादमेकमासंतांबूलाभ्यंगादीनिवर्ज्यादीनि एतेषुचस्नानादिषु
सौरश्चाद्रोवामासश्चाश्वयुजीयः तुलामकरमेषेषुप्रातःस्नानंविधीयते रविष्यब्रह्मचर्यंचमहापातकनाशनमितिविश्वस्मृतेः
आश्विनस्यतुमासस्यशुक्लैकादशीभवेत् कार्तिकस्यव्रतानीतस्यांवप्रारभेत्कधीरितिपाद्मोक्तेश्चेतिकार्तिकरुत्यं
अथकार्तिकोद्यापनविधिः पाद्मे नारदउवाच अथोर्जव्रतिनःसम्यक्उद्यापनविधिंनृप तंश्रृणुष्वमयाख्यातंसविधानंवि
शेषतः ऊर्जशुक्लचतुर्दश्यांकुर्योदुद्यापनंव्रती व्रतसंपूर्णतार्थायविष्णुप्रीत्यर्थमेवच तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशु

मौ स्फुरद्गुणांवृतुर्द्वारांपुष्पचामरशोभितां द्वारेषुद्वारपालांश्चपूजयेन्मन्मयान्पृथक् पुण्यशीलंसुशीलंचजयंविजयमेवच तुलसी
मूलदेशापुसर्वतोभद्रमेवच चतुर्भिर्वर्णकैःसम्यक्शोभाढ्यंसमलंकृतं तस्योपरिष्टात्सपिधानंपंचरत्नसमन्वितं मुद्गफलनसपूर्णं
कुंभंतन्निधायच पूजयेत्तत्रदेवेशंशंखचक्रगदाधरं कौशेयपीतवसनंपुन्नस्तसमन्वितं मुद्गफलेनसंपूर्णकुंभंतन्निधायच
द्वारेषुप्रतिबुद्धोसौत्रयोदश्यांयतःस्मरेः इतीचिंतश्चतुर्दश्यांतस्मात्सम्यक्प्रियाविह तस्यामुपवसेद्भक्त्याशांतःप्रयतमानसः पूज
येद्देवदेवेशंसावर्णंगुर्वनुस्मया उपचारैःषोडशभिर्नानाभक्ष्यसमन्वितैः रात्रौजागरणंकुर्याद्गीतवाद्यादिमंगलैः मतिंकुर्वंतियै
र्नरानाजागरणेचक्रपाणिनः जन्मांतरशतोद्भूतंतेषांमुक्ताःपापसंचयैः नराणांजागरेविष्णोर्गतंनश्यंप्रकुर्वतां गोसहस्रंच
दत्तंफलसममुदाहृतं गीतनित्यादिकंकुर्वद्भ्योयन्मोदुकानिच पुरतोवासुदेवस्यरात्रौवहरिवासरे पठनविष्णुचरित्राणांय
रंजयतिविष्णवान् सुखेनकुरुतेवापंस्वेछालापांश्चवर्जयेत् ततश्चपौर्णमास्यांचसपत्नीकान्द्विजोत्तमान् त्रिशन्मितांस्तथैकं
वासशाल्यान्नानिभोजयेत् वरान्दत्वायतोविष्णुमत्स्यरूपभवन्ततः तस्यांदत्तंतुतत्सर्वंतरक्षय्यफलंलभेत् अतस्तान्भोजये

द्विजान्पायसान्नादिनान्नती भक्तोदनाशितान्भोजयेत्कार्तिक्यां तिलपायसं प्रीत्यर्थं देवदेवस्य देवानांचरुपक्वं पृथक् दक्षिणांचयथाशक्ति
प्रदद्यात्प्रणमेच्चतान् देवरूपंसमभ्यर्च्य देवाश्चतुलसीतथा ततोगोकपिलांतत्रप्रजयेद्विधिवद्व्रती गुरुव्रतोपदेष्टारं वस्त्रालंकारणा
दिभिः सपत्नीकंसमभ्यर्च्यनाम्नाविप्रान्क्षमापयेत् युष्मात्प्रसादाद्देवाः प्रसन्नोममसर्वदा व्रताद्स्माच्चयत्पापंसमजन्म
कृतंमया तत्सर्वंनाशमायातुस्थिरामेचास्तुसंततिः मनोरथाश्चसफलाःसंतुनित्यंतवार्चनात् देहांतेवैष्णवंस्थानंप्राप्नुयान्नति
र्लभं रतिस्तमाप्यतान्विप्रान्प्रसाद्यविसर्जयेत् कार्तिकेवाव्रतपूर्तिविधिरेवंविधःस्मृतः नारद एवंयःकुरुतेसम्यक्कार्ति
कव्रतंनरः विष्णुप्रासतुनिर्मुक्तोविष्णुसान्निध्यगोभवेत् देवस्तवस्तस्तं सर्वव्रतैःसर्वतीर्थैसर्वदानैश्चयत्फलं त
त्कोटिगुणीतंतंयंसम्यगस्यविधानतः तेधन्यास्तेमहापुण्यास्तेषांसर्वफलोदयः विष्णुभक्तिरतास्तस्यः कार्तिकव्रतकारिणः
देहस्थितानिपापानिवितर्कयोतितत्क्षयात् क्षयास्यामोवयंतेवंयइत्येवंव्रतहन्नरः नारदउवाच रत्यङ्गव्रतनियमान्भ्रूणो
क्तिभक्त्यादोवष्टवायनित्यं तेसम्यान्नतनिष्कर्मकरणात्फलंभवेद्यत्तत्सर्वकलुषविनाशनंलभते रतिकार्तिकोद्यापनविधिः

अथमार्गशीर्षकृत्यं मार्गेहाभारते मार्गशीर्षंतुयोमासमेकभक्तेनसंयतेत् भोजयेत्तुद्विजान्शक्त्यासमुच्चेन्नाधिकिल्बिषैः स्नुषिभा
गीवधूधानोद्भवधान्यश्चजायते वामनपुराणे स्वराष्ट्रेश्वनरागावःशकटानिभजाविक दातव्यंकेशवप्रीत्यमासमार्गशिरेनरैः
इतिमार्गशीर्षकृत्यं अथमाघकृत्यं विष्णुस्मृतौ तुलामकरमेषेषुप्रातःस्नायीभवेन्नरः हविष्यंभक्षयंश्चयंयच्चमाघेपापकर्माणान
मिति प्रभासखंडे माघेमासिचयःस्नायात्तेनैरंतर्यंणभारते पौरीकफलंतस्यदिवसेदिवसेभवेत् श्रीपुराणे एकादश्यांशु
क्लपक्षेपापमाससमारभेत् त्रिकालमयीदीक्षांत्यक्त्वाभोगाजितेंद्रियः माघस्यैकादशीशुक्लेस्नायाद्विद्यारोत्तमः इंद्रत्रिकालस्ना
नेनिराहारस्यैवसारचयेत् स्नानकालश्चपद्मपुराणे माघमासेरुत्यापःकिंचिदभ्रंकितेरवितौ भविष्योत्तरे योमाघ
मास्यघमिसूर्यकरामितप्रेस्नानंसमाचरतिचारुनरीप्रवास्यति ब्रह्मे भरुणोदयेतुसंप्राप्तेस्नानकालेविचक्षणः माध
वांघ्रियुगंध्यायन्यःस्नायीतिस्मरन्नुक्तरीति एतानिशुक्लपक्षयाव्यवस्थितानि भत्रसंकल्पमंत्रमारुविष्णुः तत्रोत्थापुनि
यमंगरुणायादिधिपूर्वकं माघमासमिमंपूर्णंस्नास्येहंदेवमाधव तीर्थस्यास्यजलेनित्यमितिसंकल्पचेतसि स्नानमंत्रःपाप

ज्ञरवरारिघ्ननाशायश्रीविलोलोषणायच प्रातःस्नानंकरोम्यद्यमाघेपापविनाशनं मकरस्थरवौमाघेगोविंदाच्युतमाधवस्नानेनानेनमदत्वयथालफलदोभव इममंत्रमनुद्धायस्नायान्नानसमन्वितइति सवित्रेप्रसवित्रेचपरंधामजलेमम त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधेतिमंत्रेणसूर्यायार्घ्यदानमुक्तंपूर्वोक्तोदये मासपर्यंतमसंभवेत्त्रयंकर्तव्यं अस्मिन्योगेत्वशक्तस्तुस्नायादपि दिनत्रयं प्रयागमाघमासंतुकृत्वास्नातस्ययत्फलं नाश्वमेधसहस्रेणतत्फलंलभतेध्रुवंतिपाद्मात् प्रयागेसंभवेत्काशीरवेः काश्युद्भवप्रयागेयेतपसिस्नातिमानवाः दशाश्वमेधजनितंफलंतेषांभवेद्ध्रुवमिति भविष्योत्तरे अप्राप्तशरीरस्तुयःकुर्यात्स्नान माचरत् पदपद्मभवस्यफलंप्राप्नोतिमानवः नारदीये नवकृंसवयत्स्नातोद्यस्नातोपिवूरानने होमार्थंसवयेद्धविंशी तार्थंनकदाचन अहन्यहनिदातव्याःतिलाःशर्करयान्विताः त्रिभागस्तुतिलांहंतिचतुर्थंःशर्करान्वितः तथा तिलस्नायीति लोहितःतिलस्नायीतिलोदकी तिलभक्तृतिलदाताचषड्तिलाःपापनाशनाः तेलमामलकाभ्यंवतीर्थदेयास्तुनित्यशः तथाप्रज्वाल्यवेद्धविंसेवनार्थंद्विजन्मनां पाद्मे दातव्यादीपकोरवेर्देवमुदिश्यमाधव विष्णुः माघमास्यसिंप्रत्यहंतिलैर्कुं

त्वासयतकुशरंब्राह्मणान्भोजयित्वादीप्तामिभवतीति माघव्रतोद्यापनमाह चंद्रप्रकाशेविष्णुः। एवंस्नानावसानेतु भोज्यंदेयमथोचितं। भोज्येद्विजदांपत्यंभूषयेद्वस्त्रभूषणैः। कंबलाजिनरत्नानिवासांसिविविधानिच। दोलकानिचदेया निप्रस्तारनपटांस्तथा।उपानेतेतथायुग्मंछत्रंचकोपपाचकं। अनेनविधिनारद्यामाधवःप्रियतामिति अत्रसमापन मंत्रः सवित्रेचप्रसवित्रेचपरंधामजलेमम। त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधा दिवाकरजगन्नाथप्रभाकरनमोस्तुते। परिपूर्णंकरिष्येहंमाघस्नानंतवाज्ञया। अहन्यहनिदातव्यास्तिलाःशर्करयान्विताः। माघावसानेसुभगेषड्विंशद्ब्राह्मणंतथा सूर्यामेप्रीयतांदेवोविष्णुर्मूर्तिर्निरंजनः। दंपत्योर्वाससीसूक्ष्मेसप्तधान्यसमन्विते त्रिशत्मोदकादेयाःशर्करातिलसंयुताः। भागत्रयंतिलानांतुचतुर्थःशर्कराशकः अनभ्रंगोवरारोहसर्वंमासंनयेद्यदि। विशेषोद्यापनंतुकर्तुंकेवाथतपसिविधिरेवंविधःस्मृतइतिवचनात्पूर्वोक्तएवज्ञेयः इतिमाघकृत्यं। अथफाल्गुनकृत्यं स्कांदे एकभक्तंतुकुर्वाणःफाल्गुनेमासिनित्यशः। स्त्रीषुसौभाग्यमाप्नोतिस्त्रियश्चपरमप्रियः वा

मनपुराणे फाल्गुनेत्रीह्योगावोवत्सत्रस्तांजिनांचितं गोविंदप्रीणनार्थायदातव्यंपुरुषर्षभ। तथा प्रातःस्नायीभवेन्नित्यंपौ
मासौमाघफाल्गुनौरति। इतिफाल्गुनकृत्यं अथमलमासः सद्विविधः अधिमासःक्षयमासश्चेति आद्यस्वरूपंमा
धवीयेब्रह्मसिद्धांते द्वात्रिंशद्भिर्गतैर्मासैर्दिनैःषोडशभिस्तथा घटिकानांचतुष्केनयतत्यधिकमासतइति। द्वितीयस्वरूप
मितिसिद्धांतशिरोमणौ असंक्रांतिमासोधिमासस्फुटस्याद्द्विसंक्रांतमासःक्षयाख्यःकदाचित् क्षयःकार्तिकादित्रये
नानान्यतःस्यात्तद्वर्षमध्येधिमासद्वयंक्षयैकेति अधिमासद्वयंक्षयात्सर्वमेकःपरस्मादनंतरमित्यर्थः तस्यागमनकालोप्यु
क्तःशिद्धांतशिरोमणौ गतोब्धींद्वीनंदे २७४ मितेशाककालेतिथीशै ११९५ र्भविष्यत्यधोगाक्षसूर्यैः १२५६॥ गजाद्रिभू
भूमि १३७८ स्तथाप्रायशोयंकुवेदेंदु १४१ वर्षैःकविर्वै कुभिश्चेति अस्यार्थः अब्धयश्चत्वारः अद्रयःसप्त नंदा
नव एतत्संख्यत्रयंअंकानांवामतोगतिरितिप्रकारेणप्रातिलोम्येनबोध्यं एवंचमेलनेचतुःसप्तत्यधिकनवशतसंख्या
संपद्यते एभिर्वर्षैःपरिमितेकालेकश्चिक्षयमासःपूर्वंजातइतिअर्थः एवमत्रापिप्रातिलोम्येनसंख्याबोध्या तिथयः

पंचदश शिाएकादश पंचदशाधिकशतयुक्तसहस्रसंख्याकैर्वर्षैर्मितेयातेकश्चित्क्षयमासोपेतःसंवत्सरोभविष्यतीत्य
र्थः अंगानिषट् अक्षाणिपंच सूर्याद्रादश षट्पंचाशदधिकशतत्रयोपेतसहस्रसंख्याकैर्वत्सरैर्मितेजातेभविष्यती
त्यर्थः गजाभ्रभौ अद्रयःसप्त अग्नयस्त्रयः भूरेका अष्टसप्तत्यधिकशतत्रयोपेतसहस्रसंख्याकैर्जाते भवि
ष्यतीत्यर्थः कुरेका वेदाश्चत्वारः इंदुरेकः एकचत्वारिंशदधिकशतसंख्याकैर्वर्षैस्तथागावः नवकुरेका एको
नत्रिंशतिसंख्याकैर्वर्षैरयंप्रायशोजायतइत्यर्थः इतिमलमासस्वरूपं। अथाज्यवज्योर्वर्ज्यमुच्यते तत्रमाधवी
येपठितमिः श्रौतस्मार्तक्रियाःसर्वाद्यमासिकीर्तिताः त्रयोदशतुसर्वास्ताःनिष्फलाःपरिकीर्तिताः जाबालिर
पि नित्यनैमित्तिकंकुर्यात्प्राग्दीक्षांकुर्यान्मलिम्लुचे तिथिनक्षत्रयोगंकाम्यंनैवकदाचन कानिचिन्नित्यान्यपिमलिम्लु
चेवर्ज्यानीतिकाठकगृह्ये षष्ठ्यन्याधेयणाधानचातुर्मास्यादिकान्यपि महालयाष्टकश्राद्धपाकमांद्यपिकूर्मयत
स्पष्टमासविशेषाख्यानिषिद्धवर्जयेन्मलरति षष्टिष्टिकाठकादौप्रसिद्धा। मदनरत्नेस्मृतिसंग्रहे ज्ञातकर्मचूडस्

DR. BHAU DAJI MEMORIAL डाक्टर भाऊदाजी ह्यात्व्यसंग्रहालय

सीमंतोन्नयनव्रतं मलिम्लुचेपिकुर्वीतनिमित्तेयदिजायतइति माधवीयेभृगुः दृष्ट्वाऽतथासोममग्न्याधेयंमहालय
राजाभिषेकंकाम्यंचनकुर्याद्गुरुलंघितइति बृहस्पतिरपि अग्न्याधेयंप्रतिष्ठांचयज्ञदानव्रतानिच वेदव्रतंवृषोत्स
र्गंचूडाकर्णमेखलाः मांगल्यमभिषेकंचमलमासेविवर्जयेत् वृषोत्सर्गःकाम्यः ज्योतिःशास्त्रे तत्रदत्तमदत्तंचकृतंनकृ
तमेववा सज्ञप्तमथजप्तंस्यात्तत्रोपवासःकृतोभवेत् नयात्रांतविवाहंतुनचवास्तुनिवेशनं नप्रतिष्ठांचदेवानांप्रा
सादयामभूरुरुमिति स्मृत्यंतरेपि वापीकूपतडागादिप्रतिष्ठायज्ञकर्मच नकुर्यान्मलमासेचमहादानव्रतानिचे
ति प्रजापतिरपि उपाकर्मचहुत्वंचकुर्यात्पर्वत्रयंतथा उत्तरेनियतंकुर्यात्पूर्वंतन्निःफलंभवेत् अन्यत्रापि भ्रव
णाश्वेषमंतःसर्पाणांबलिरष्टकाः ईशानस्यबलिर्विष्णोःशयनंपरिवर्तनं प्रायश्चित्तंतुसर्वेषांमलमासेविवर्जयेत
ग्रहपरिशिष्टे श्रवणद्वादशामाश्चपर्वचाग्रयणंतथा मलमासेपिकर्त्तव्यंकाम्यारूढीश्चवर्जयेत् श्रवणद्वादशी
माः अग्निहोत्रोपासनवैश्वदेवाद्यः पर्वदर्शपूर्णमासौस्थालीपाकोवा आग्रयणमाग्रयणेष्टिः सावदुर्भि

स्मृतिरपिकार्या बृहस्पतिः बालेवायदिवाबृद्धेभृगावस्तंगतेगुरौ मलमासस्रवेतानिवर्जयेद्देवदर्शनमिति आधानंयज्ञ
कर्मोदिप्रायश्चित्तव्रतानिच नकुर्यान्मलमासेपिभृगुवौरुपप्लवे अस्तंगतेगुरौभृगौवृद्धबालेमलिम्लुचे व्रतारंभाधर्म
र्गंचनकुर्यान्मौञ्जिबंधन निःक्रमंजातकर्मोणिकाम्येष्टिविसर्जनमिति जातकर्मोणिजातेष्टिः बहुवचनंछांदसं अस्त
उल्कोब्रह्मसिद्धांते रविणासहितेन्येषांग्रहाणांमस्तउच्यते ततोर्वाग्वाऽर्कमौढ्याद्ऊर्ध्वंबाल्यंप्रकीर्तितमिति वार्द्धकबा
ल्ययोर्मानमपितत्रैव पक्षप्राग्दिशिवृद्धत्वंपश्चात्तंचदिनंकवेः शैशवंप्राक्तुपंचाहंपश्चाद्दशदिनंस्मृतमिति कविभृक्
अत्रविशेषः पक्षेबृहन्मासस्तुबालश्चात्रदशाहिकः पादास्तुदशाहानिवृद्धोबालादिनत्रयं महास्तुपादास्तत्रत्रयाणं
तु द्वात्रिंशद्दिवसाश्चास्तेजीवस्यभार्गवस्यतु द्वासप्ततिर्महत्यस्तेपादास्तेद्वादशाऽहमादिति अत्रैव प्राक्तुपश्चाद्वुदितः
भृक्वंगिरसोर्दिनैर्भौशेः विपरीतंतुबृहत्तेतद्देवगुरोरपीतिरत्यादिनान्यूनाधिकभावःश्रूयते एतद्व्यवस्थामा
हुर्गर्गः भृक्वोगुरुःप्रागपराक्चबालोविंध्यदशावंतिषुसप्तरात्रं वंगेषुरूपेषुचषट्चपंचशोपंचदशेत्रिदिनंवदंति

दृष्ट्वमप्यतत्प्रमाणंज्ञेयं एवंवक्रातीचारीसिंहराशिगतोगुरुरस्तंगतश्चभ्रूभकर्मसुवर्ज्यः तदुक्तंलल्लेन नीचस्थेवक्रसं
संस्थेप्यतिचरणगतेबालवृद्धास्तगेवासन्यासोदेवयात्राव्रतनियमविधिःकर्णवेधोपिदीक्षा मौञ्जीबंधोपचूडापरिणयन
विधिर्वास्तुदेवप्रतिष्ठावन्यासक्रियःप्रयत्नात्तिरणपतिगुरौसिंहराशिस्थितेचेति नीचस्थामकरस्थः विशेषमाहमांडव्यः
श्रुतिवेधजातकान्नप्राशनचूडादिकंसर्वं रविभवनरंध्रजीवकार्यवर्ज्यावित्याहस्थिति तथा रविस्तंगतजीवजीवस्तंग
तेरवौ वर्जयेत्सर्वकर्माणिव्रतस्वस्ययनानिच तथागुर्वादित्यगुरौसिंहभ्रूभकेचास्तमुपागते। खलेधानंमखदानंव्रतं
देवविलोवाने लल्लः गुरुक्षेत्रगतोभानुर्भानुक्षेत्रगतोगुरुः गुर्वादित्यःसविज्ञेयःसर्वकर्मेक्षगर्हितः शौनकः एक
राशिगतोभानुजीवोस्यातायरापुनः व्रतवधविवाहादिभ्रूभकर्माखिलंजगत राजमार्तंड यात्रोद्वाहविवाहश्रुतिवि
वरविधिशरवपप्रवेशंप्रासाद्यानरम्यंस्करनरभवनारंभविद्याविधानं मौञ्जीबंधव्रतिष्ठामणिकनकरत्नाधार
णंकुर्वंतेयेमृत्स्नासिंहस्थितेज्येगुरुदिनकरयोरेकराशिस्थयोश्च तथा गुर्वादित्यगुरौसिंहनक्षभ्रूकमलिखुचे

पाप्यापनेहरौस्नेत्तसर्वकर्माणिवर्जयेत् सिंहस्थगुरोविशेषमाहरातानंदः माघांयदिमघानास्तसिंहेगुरूरकारणंइति भन्न
त्रापि मघाऋक्षंपरित्यज्यपूर्वाफल्गुनीभवेत् तदाचेत्कन्यकाऽद्यास्कभगास्त्रियाभवेत् माघीमघाचसंयुक्तामघायांचगु
रुर्भवेत् महामाघस्तदाप्रोक्तोव्रतोदाहेचवर्जयेत् दृग्गार्ग्यः मीनेकन्यासिंहेचस्थितेसप्तनुरंगमे सौरमयनकुरुतविवा
हंगृहकर्मच तथा गार्गेयकृपतडागगयागमनसौरप्रतिष्ठाव्रतंविद्यामंदिरकर्णवेधनमखदानंवनंसेवनं तीर्थस्नानश्रि
हरिभवनमंत्रादिदेवेक्षणंहरेणवज्जिंगीविष्णुःपरिहरेदस्तंगतेभार्गवइति लल्लोत्रपुनर्विशेषमाह उपलवेशीतलभानुभान्वो
रर्दारयेवाकपिलापद्मो सरासरेज्यास्तमयेचतिर्यंयात्राविधिःसंक्रमणेचशस्तः गुरुशुक्रमयादिनिषिद्धकालेयत्रणारो
नरोषरतिलक्षीरादृतवचनार्थः सएव भ्रतिचारगतोजीवतेराशिनैतिचेत्पुनः लुप्तःसंवत्सराज्ञेयःसर्वधर्मबहिष्कृतः
भस्यापवादः वृषमेषेसषकुंभेयदिचारगोगुरुः नतत्रकाललोपंस्यादित्याहगालवोमुनिरिति गयाविषयेवापुष्प
राणेविशेषउक्तः गयायांसर्वकालेषुपिंडदानादिचक्षणः अधिमासजन्मदिनेअस्तेचगुरुशुक्रयोः नत्यक्त्वंगयात्राद्

सिंहस्थेचबृहस्पतौ तथा गौदावर्योगयायांचश्रीशैलेग्रहणद्वये स्नरास्करगुरूणांचमौढ्यदोषोनविद्यते तथा शांतिकर्मप्र
कुर्वंतरोगनिमित्तिकेतथा गुरुभार्गवमौढ्यादिदोषस्तत्रनविद्यतइति तथाकाश्यामपिस्कांदे सदाकृतयुगंचात्रमहापर्व
सदात्रवै नग्रहास्तोदयस्तोदोषोविश्वेश्वरालये सदासौम्यायनंतत्रसदातत्रमहोदयः एतानिकाशीस्कृतिमात्रपराणीति
वृद्धाः माघे दर्शेषडशीतिश्चाद्दानंचप्रतिवासरं गोक्षतिलहिरण्यानामासेपिस्यान्मलिम्लुचे मदनरत्नेयमः श्राद्धिकंप
मंयस्यात्तत्कुर्वंतमलिम्लुचे चतुर्दशेतुसंप्राप्तेकुर्वंतपुनराब्दिकं पुनराब्दिकंद्वितीयाब्दिकं सत्यव्रतोपि वर्षेवर्षेतुयद्वा
ऽमातापित्रोर्मृतेहनि मलमासेनकर्तव्यंव्याघ्रस्यवचनंयथा यानिमासद्वयेपिकुर्वंतेत्यादिनिबंधनानितानिमासिकवि
षयाणीतिमदनरत्ने मलमासव्रतानांतुयदिकरात्तिस्तदेवमलमासउपागतस्तत्रातत्रैवप्रत्याब्दिकंकार्यंनतुश्रुरमासे
तदाहमाधवीयेभृगुः मलमासमतानांतुयच्छ्राद्धंप्रतिवत्सरं मलमासेतुकर्तव्यंनान्येषांतुकदाचनेति यत्तुरुमाद्रौव्यासः
मलमासमतानांतुसोरंमानंसमाश्रयेत् सएवदिवसस्तस्यश्राद्धपिंडोदकादिष्वितिदर्शेतत्परमेव क्षयमासेतुतत्रैव

प्रत्याब्दिकंकार्यं तदामदनरत्नेसत्यव्रतः एकएवयदामासःसंक्रांतिद्वयमासतः मासद्वयगतंश्राद्धंमलमासेपिशस्यतइति त
च्चयस्यालिंथेःपूर्वोरमतःसर्वतिथिःस्यात्सर्वमासस्थितामाद्या उन्नाद्यैचेतदाउत्तरमासस्थिताग्राह्या तथाचाऽऽदीपिकायां
तिथ्यैप्रथमपूर्वाद्वितीयैरुत्तरः मासाविति बुधैश्चिंत्योक्षयमासस्यमध्यगाविति अथात्रदानमुक्तंहेमाद्रौपाद्मे अ
धिमासेतुसंप्राप्तेमुरसर्पिर्घृतानिच त्रयस्त्रिंशदपूपानिदातव्यानिदिनेदिने अधिमासेतुसंप्राप्तेत्रयत्रिंशत्तुदेवताः उद्दिश्या
पूपदानेनपृथ्वीदानफलंलभेत् त्रयत्रिंशदपूपान्पंकास्यपात्रेनिधायच सघृतंसहिरण्यंचब्राह्मणायनिवेदयेत् विष्णुरू
पीसहस्रांशुःसर्वपापप्रणाशनः अपूपान्नप्रदानेनममपापंव्यपोहतु नारायणजगद्बीजभास्करप्रतिरूपक व्रतेनानेन
पुत्रांश्चसंपदंचमेविवर्धय यस्यहस्तेगदाचक्रेगरुडोयस्यवाहनं शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु कलाकाष्ठादिरूपेण
निमेषघटिकादिना योवंचयतिभूतानितस्मैकालात्मनेनमः कुरुक्षेत्रमयदेशःकालःसर्वार्द्धनोरविः पृथ्वीसममिदंदानं
गृह्यतांपुरुषोत्तम मलानांचविशुद्ध्यर्थंपापप्रणाशनायच पुत्रपौत्रानिवृध्यर्थंतवदास्यामिभास्कर मंत्रेणानेनयोदद्यात्

त्रयस्त्रिंशदधिकान् प्राप्नोतिविपुलांलक्ष्मीपुत्रपौत्रादिसंपदः इतिमलमासनिर्णयः अथर्तुनिर्णयोच्यते सचषड्ऋतुमासद्वयात्मकश्चांद्रःसौरश्च वसंतोग्रीष्मोवर्षाशरद्धेमंतःशिशिरइति षड्ऋतवइतिश्रुतेः यत्तुश्रुतौद्वादशमासाः पंचर्तवइत्यत्रतत्रपंचप्रयाजानुरोधेनहेमंतशिशिरयोरेकीकरणंविवक्षितं तेचवसंतपंचमाः मुखंवाएतदृतूनांयदग्निस्तदितिश्रुतेः मासद्वयात्मकत्वंचाग्निचयनेष्टकोपधानब्राह्मणे द्वेद्वेमुपदधातितस्माद्द्वेमतवइति वसंताद्दत्तुक्रमेणचैत्रमासादिर्द्वइति मधश्चमाधवश्चवासंतिकावृतवइतिश्रुतेः ननुकथंचिदधिमासेसतिमासत्रयात्मकःकश्चिदृतुर्भवतितत्कथंमासद्वयात्मकत्वमितिचेत् न अधिमासस्यषष्ठिदिनात्मकमासावयवात्मकस्यप्रतिपादितत्वात् अथचांद्रःसौरोवृश्चिकोरत्नमालायां मृगादिराशिद्वयभानुभोगात्षड्ऋतवःस्युःशिशिरोवसंतः ग्रीष्मश्चवर्षाचशरच्चतद्वद्धेमंतनामाकथितोनयइति ऋतुनिर्णयः अथायनं तत्रऋतुत्रयात्मकंसौरमेव तदुक्तंदीपिकायां सौरर्तुभिस्त्रयंप्रदिष्टमयनमिति ऋतुत्रयंचायनंस्यादितिमदनरत्नेविष्णुधर्मोक्तेश्च तच्चैरिविधं उत्तरंदक्षिणंच शिशिरादि

त्तरं वर्षादिदक्षिणं तदुक्तंरत्नमालायां शिशिरपूर्वमृतुत्रयमुत्तरायणमाकुरुश्चतरामरं भवतिदक्षिणमन्यदृतुत्रयंनिगदितारजनिमरुताचसेति श्रुतिरपि तस्मादादित्यःषण्मासान्दक्षिणेनेतिषडुत्तरेणेति अनयोरुपभोगमाहमाधवीयकूर्मपुराणे उदगयनआपूर्यमाणपक्षस्यपुण्याद्दादशीमुपवसेद्वृतीभूत्वेत्यादि सत्यव्रतोपि देवतारामवाप्यादिप्रतिष्ठोत्सर्गवारेषु दक्षिणाशामुखेकुर्वन्ननंतफलमवाप्नुयादिति वैखानससंहितायां माल्भैरवधारानारसिंहत्रिविक्रमाः महिषासुरस्त्रीच स्थाप्यादक्षिणायनेति मदनरत्नेज्योतिःशास्त्रे गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबंधपूर्वं सौम्यायनैकमेफलप्रदं संपठ्यतेतत्तत्कृत्यंतुदक्षिणेचेति ऋत्ययननिर्णयः अथसंवत्सरनिर्णयः सचमासत्रैविध्यात्त्रिविधइतिस्मृतिः अतएवब्रह्मसिद्धांते चांद्रसावनसौराणांमासानांप्रभेदतः चांद्रसावनसौरास्त्रयःसंवत्सराइति। तत्रचांद्रसंवत्सरेचैत्रशुक्लप्रतिपदादिःफाल्गुनपौर्णमांतः सौरस्तुमेषादिद्वादशराशिभोगेन सावनःषष्ट्यूनत्रिशतत्रयाहोरात्रात्मकः अथउक्तंब्रह्मपुराणे चैत्रमासिजगद्ब्रह्मासर्जप्रथमेहनि शुक्लपक्षेसमग्रंतुतदासूर्योदयेसतीति आदित्यपुराणेपि

पस्मेरत्सर्वकर्मादौचाऽसंवत्सरंयदा नान्ययस्माद्वत्सरादौप्रवृत्तिरस्यकीर्तितेति रमेचारंभसमाप्तिकर्मांगस्मरणएवोपयुज्ये
ते वस्तुतस्तु मासांतरस्थतिथ्यंतरमारभ्यवर्षांतरस्थतत्पूर्वनाविति स्यतोपिवत्सरश्चाऽएव चेऽकलारूपतिथिघटितत्वात्
अन्यानपिभेषानाहनारदः प्रभवोविभवःशुक्लःप्रमोदोपप्रजापतिः अंगिराश्रीमुखोभावोयुवाधातास्तथैवच ईश्वरोबे
हुधान्यश्चप्रमाथीविक्रमोवृषः चित्रभानुःसुभानुश्चतारणःपार्थिवोव्ययः सर्वजित्सर्वधारीचविरोधीविकृतःखरः नंद
नोविजयश्चजयोमन्मथोदुर्मुखो हेमलंबोविलंबश्चविकारीशार्वरीप्लवः शुभकृच्छोभनःक्रोधीविश्वावसुपराभवो प्लव
गःकीलकःसौम्यःसाधारणोविरोधकृत परिधावीप्रमाथीचानंदोराक्षसोनलः पिंगलःकालयुक्तश्चसिद्धार्थीरौद्रदुर्म
तीदुंदुभीरुधिरोद्गारीरक्ताक्षीक्रोधनोक्षयः इति एताश्चसंज्ञायद्यपिज्योतिःशास्त्रेबार्हस्पत्यस्यैवोक्तास्तथापिचाऽन्यत्रा
प्रभवादीनामितिचाऽस्यैवप्रभवादीनामभिर्व्यवहरंतिशाचाराच्चमासपक्षादिवत्प्रभवादिभ्योऽब्दसंवत्सरादिसंकल्पा
दौसंकीर्त्यः ज्योतिःशास्त्रेतुबार्हस्पत्यनाक्षत्रावपिवत्सरावुक्तौ तत्रैकस्यतेमध्यममानेनैकराशिभोगोबार्हस्पत्यः।

सप्तविंशतिनक्षत्रपरिवर्त्यादेकोमासःतैर्द्वादशभिर्वत्सरःअनयोरूर्ध्वमेशास्त्रेणैकोपुपयोगः रतिसंवत्सरनिर्णयः
अथजन्ममासिकर्तव्यं चाऽऽमसीयत्नेनसावधानात् ब्रह्मपुराणे सर्वेष्वजन्मदिवसेस्नानंमंगल
पाणिभिः गुरुदेवाग्निविप्राश्चपूजनीयाःप्रयत्नतः स्वनक्षत्रंचपितरतथादेवःप्रजापतिः प्रतिसंवत्सरंचैवकर्तव्यश्चमहोत्सवः
स्नातंतिलस्नातेः तथाचतत्तिथिमधिकृत्य तिलस्नायीतिलोदर्तीतिलहोमीतिलोदकी तिलभुक्तिलदाताचषड्तिलीना
वसीदति मंगणपाणिभिःअप्रेतार्थंसिद्धिहेतुनयागोरोचनादिकंमंगलं तत्पाणिभिरित्यर्थः तथाचकल्पचिंतामणौ गुरुरुग्र
तिलानघाज्जन्मर्क्षेश्वबंधनं गुग्गुलुंनिबसिध्यर्थंपूर्वंगोरोचनायुतं संपूज्यभानुविप्रेभ्यमर्षिभार्ययेदिदं चिरजीवीयथा
स्त्वंभोभविष्यामितथायुते रूपवान्चित्रवांश्चैवश्रियायुक्तश्चसर्वदा। मार्कंडेयमहाभागसप्तकल्पांतजीवन आयुरिष्टा
र्थसिध्यर्थंमस्माकंवरदोभव स्वनक्षत्रंजन्मकालिनं नामकरणेतथादर्शनात् तथा श्रीपतिरत्नमालायां नवरत्नाध
रोभूत्वापूजयेच्चविरायुषं हिभृंजंजटिंसौम्यंस्कंदंचिरजीविने मार्कंडेयंनरोभक्त्यापूजयेत्प्रयतस्तथा ततोरोगापु

षंव्यासरामश्रौणिरूपंबलिं प्रह्लादंचरन्तुमंतंविभीषणमधार्चयेत् षष्ठीवृद्धिभक्तेवर्षेवर्षेपुनःपुनः रामःपरशुरामः
द्रौणीरश्वत्थामा ततःस्नेहरामःपूजीतदेवतानाममंत्रैःस्वाहांतैःकार्यः देवीपुराणे होमोयंरुद्रादिपूजायांशांतमष्टांतरंभवे
त् अष्टाविंशतिरेवंवायषाशक्तिविधीयते ततोगुडुच्यतिलपानं तत्रमंत्रः सगुडंतिलसंमिश्रमज्जलंहंमितंपयः मा
कंडेयवरंलब्धापिबाम्यायुष्यहेतवइति स्कांदे खेऽनंतरक्तेशानामेधनाध्वानरवेच भामिषंकलहंहिंसांवर्षंषड्विव
र्जयेत् कलहमित्यत्रसंगरकमितिक्वचित्पाठः वृद्धमनुः मृतेजन्मनिसंक्रांतोभ्रातृजन्मादिनेतथा अस्पृश्यस्पर्शने
चैवनस्नायादुष्णवारिणा जन्मनिपुत्रजन्मनि ज्योतिषे स्नातान्नक्षत्रदिनेस्त्रियंपरिहरन्नाप्नोत्यभीष्टंप्रियंजन्मत्यान्मो
क्षमतोहिज्ञायरक्तोपर्य्यस्थिरंवहते सकृन्नरवादतियश्चतस्यरिपवोनाशंप्रयांतिध्रुवंभक्तंयश्चनिरामिषंसहिभवेन्न
क्षत्रतिथिः जन्मतिथिःस्वरूपंतुदेवीपुराणे यस्मिन्दृश्यजन्मतिथिर्यदास्यात्स्यातदाजन्मभसंयुताच असंस्कृताभेन
दिनद्वयेपिपूज्यापरायाभवतीहतंत्रं उभयदिनेजन्मनक्षत्रलाभेतुपरोक्ष्यापिनीग्राह्यातस्यकर्मकालत्वात्

अपकेपुचित्यदर्पेषुवर्जनेतिथयः सिनीवालीदर्शनं तिथ्याभिद्रुषितंकुर्यात्तस्मात्त्यजेन्नतंसदेति सन्नम्यांनस्प
शेत्तैलंनीलवस्त्रंनधारयेत् नचाप्यामलकंस्नायान्नकुर्यात्कलहंरहः निंबस्यभस्मतैलंतिलैस्तर्पणमंजनं सन्नम्यांनैवकुर्वीत
ताम्रपात्रेचभोजनं स्कांदे शिरःकपालमंत्राणिनरचर्मतिलास्तथा एतानिक्रमशोनित्यंश्रद्धम्यादिषुवर्जयेदिति शिरोनारी
केलं कपालमलांबु श्रेत्राणिपटोलं नरवंनिष्पावाः चर्ममस्करिकाः तिलाःदृताक्रमितेरुग्रे चतुर्विंशतिमतेतु यदीच्छे
र्ध्वगमनमष्टम्यादिषुवर्जयेदितिउत्तरार्द्धपठितं व्यासः षष्ठ्यष्टमीश्राद्धमावास्यापर्वद्वयचतुर्दशी श्रवसंन्निहितंपापंतैलंमां
सस्त्रीभोगे वामनपुराणे नरास्तैनाभ्यंगमुपाचरेत्क्षौरंचरिक्तास्नानयास्नमांसं पूर्णास्नयाषिक्तरिवर्जनीयाभद्रास्नसर्वाणि
समारभेतेति अत्रनरानिषेधादेवषष्ठीविषयेस्त्रियुनतत्ग्रहणंदोषाधिक्यार्थमितिदृतनिर्णयोतात्पर्यंतुव्यासः सं
क्रांत्यापंचदश्यांचद्वादश्यांश्राद्धवासरे वस्त्रंनिष्पीडितंनैवक्षरेणापिनहिंस्यते वस्त्रंनिष्पीडनंयत्नपूर्णंतत्तस्यनिषेधः
सएव तैलंनसंस्पृशेद्रामस्नानेष्टदेयेन्नए पक्षादौचरबोधद्यांरिक्तायांचरेत्तिथौ श्यामंनीलंतृणं वामनपुराणे

नाभ्यंगमर्कनवभूमिपुत्रसोमंचभृकुचकुजंचमांसं बुधेनयोषांनसमाचरेतरोषेषुसर्वाणिसदैवकुर्यात् चित्रास्वरस्तेश्रवणे
चतेलेक्षौरंविशाखाप्रतिपत्सुवर्ज्यं मूलमृगभाद्रपदेषुमांसंयोषिन्मघाकृत्तिकासोनरास्तिति वाराह चतुर्दशीतथाष्टम्या
पंचदश्यांचपर्वसु तैलाभ्यंगंतथाभोगंयोषितश्चविवर्जयेत् नमद्यंगोमयंचापिनिशायांतुगोमयं गोमूत्रंचप्रदोषे
चगृह्णीयान्बुद्धिमान्नरः सप्तावर्ज्यान्यार्यमनुः चत्वारिमानिकर्माणिसंध्यायांपरिवर्जयेत् आहाराज्ञायतेव्याधि
गर्भश्चवेचमैथुनात् निद्रातोजायतेलक्ष्मीःस्वाध्यायादायुषःक्षयइति रतिकालविशेषवर्ज्यानि अथक्षौरनिषि
द्धकालः पंचदश्यांचतुर्दश्यामष्टम्यांचविशारद तैलंमांसंस्त्रियंचैवक्षौरंचपरिवर्जयेदिति यमः तथासितास्वष्टमी
षुभूतारुक्षयेतथा तैलाभ्यंगंक्षौरकर्मस्त्रीसंगंचैववर्जयेत् व्यासः क्षौरंशनैश्चरादित्यभौमास्वभ्यंगमेवच तथा
प्रतिपदरिक्तातिथिंचपरिवर्जयेत् अहोरात्रग्रहणंनवारदोषःप्रभवंतिरात्रावितिवचनबाधनार्थं हेमाद्रिज्योतिः राम
शास्त्रे नाभ्यक्तःक्षरणकालेनिरासेनानानस्नातस्तन्नगमनांशुकभूषितानो संध्यानिशार्कुजस्तुदिनेश्वराणांसो १००

रंहितंभवतिचाङ्गिनचापिषस्यो भ्रष्टीत्यरोरात्रोपलक्षणं मार्कंडेयः अष्टमीचतथाषष्ठीनवमीचतुर्दशी क्षुरकर्मणिवर्ज्या
चपर्वसंधिस्त्रथैवच वृद्धगार्ग्यः मीनधनुर्षिसिंहेचस्थितेसप्ततुरंगमे क्षौरमत्रनकर्तव्यंविवाहंगरुकर्मचेति श्मश्रुकर्मणि
मरीचिः निरासनस्यस्नानस्यतिलस्यतथैवच स्वायंभुवस्तन्त्रैवस्नातस्यकृषितस्यच यात्रापुरोधतस्यापिश्मश्रुकर्मवि
वर्जयेत् अथमांसनिरूकालः हेमाद्रौनरसिंहपुराणे यदिनामचतुर्दश्यांसहमांसंविवर्जयेत् वर्जयेत्यनेनुरुव्यक्रतुस्वर्गमाप्नो
नरः चतुर्थीचाष्टमीचैवदशमीचचतुर्दशी तथापंचदशीवार्यापडशीतिमुखानिच संक्रमेचापिसूर्यस्यविषुवेचापिवा
षिकंमांसंनुविरतामत्योयातिस्वर्गेदिनत्रयमिति संक्रमादयनविषुवतोर्ग्रहणंदोषातिशयार्थं वार्षिकेचषाकालसंवं
धिमासचतुष्टये दिनत्रयमपिवार्षिकेविरतरतिसंबंधः अथवाश्वयुजमासंवर्जयेन्मांसभक्षणे बहुमासकृतंपुण्यंल
भेताश्वयुजान्नरः अन्यत्रमासत्रयपर्यंतंमांसत्यागेयत्फलंतत्प्राप्नोतीत्यर्थः योनरःकार्तिकेमासेमांसंतुपरिवर्जयेत्
संवत्सरस्यलभतेपुण्यंमांसविवर्जनात् अथकलिवर्ज्यानि आदित्यपुराणे यत्कृतेतुयुगेधर्मानकर्तव्यःकलौयुगे

पापप्रयुक्ताश्चसराकलौनार्योनगसदेति कार्तयुगःकृतयुगसंबंधी हेमाद्रौमाधवीये विधवायांप्रजोत्पत्तौदेवरस्यनियोजनं
बालिकासतयोन्याश्चवरेणान्यैनसंस्कृतीः विधवायांवाग्दानानंतरंदेवरस्यनियोजनं यस्याम्रियेतकन्यायावाचासत्यांकृ
तेपतिः तामनेनविधानेननिजोविंदेतदेवरः अपुत्रांगुवनुज्ञातोदेवरःपुत्रकाम्यया सपिंडोवासगोत्रोवाऋतावभ्यक्तःवर
तांयाचेदितिमनुयात्तवक्ष्यामीत्यूर्ध्वंमुक्तंनिषिध्यते नतुविवाहानंतरंविधवायां नान्यस्मिन्विधवानारीनियोक्तव्याद्विजा
तिभिरितिमनुनातन्निषेधात् वरेणान्यैनसंस्कृतीरितिनदेवरनियोजनपरंपूर्वेणपौनरुक्त्यात् बालिकासंकल्पदत्तानवा
ग्दत्ता तदानीक्षतयोनित्यशंकायाश्चभावात् ईदृग्विज्ञानेश्वरेणदत्तामपिहरेत्स्वयंवेत्यंशेश्वरआज्ञेतिअनेनसप्तप
दक्रमणात्प्राग्यदन्यस्मैदानमुक्तंतद्विषयमितिभेयं तथा कन्यानामसवर्णानांविवाहश्चद्विजातिभिरिति तिस्रोवर्णानु
पूर्व्येणेतिपैकायथाक्रमं ब्राह्मणक्षत्रियविशांभार्यास्वाश्चद्वयन्यनरतिविहितः तथा भ्रातताय्यद्विजाग्र्याणांधर्म राम
युद्धमहिंसनंरति द्विजाग्र्याणांविप्राणां भ्रातताय्यनमायांतंहन्यादेवाविचारयन्नितिविहितंसन्मुखमकूटशस्त्रेणमा १०१

रणं एतेननाततायीवधेदोषोन्यत्रगोब्राह्मणेभ्यइतिस्मृतंबाकंकलिविषयमेवेतिसिद्धं तथाद्विजस्याज्ञातुनोयातुःशोधित
स्यापिसंग्रहः सत्रदीक्षाचसर्वेषांकमंडलुविधारणमिति सत्रदीक्षानिषेधमुखेनसत्राधिकारएवविप्राणांपर्युदस्यते अ
थकमंडलुचर्योपपरिशंतीत्यादिबोधायेनेतिकर्तव्यताकंसादकंचकमंडलुमितिस्नातकस्यविहितंतन्मन्नमयस्यकाष्ठम
यस्यवाकमंडलोरिणं अन्येतुकमंडलुधारणमित्यनेनवानप्रस्थाश्रमएवलक्ष्यतइत्याहुः तन्न क्षत्रवैश्ययोरुभयो
रपिभिन्नतंत्रेणोपादानात् तथा महाप्रस्थानगमनंगोसंज्ञसिद्धंगोसवेरिति महाप्रस्थानगमनंउत्तरादिगामने गोसवो
यज्ञविशेषः तथा सौत्रामण्यामपिसुराग्रहणस्यचसंग्रहःरिति अग्निहोत्रस्रुवण्याश्चलोहलोलीढापरियहः लोहजीर्णया
स्रुचः कथंचिल्लीढायाःपरियहःपुनर्होमसाधनत्वं तथा वानप्रस्थाश्रमस्यापिप्रवेशोविधिबोधितः क्षत्रस्याप्यय
सापेक्षमधसंकोचनंतयेति क्षत्रमग्निहोत्रपरिचर्यादि वैश्याग्निपुरुषविप्रस्यब्रह्मशौचमित्यतइतिदेवलवचनविहि
तं तथा प्रायश्चित्तविधानंचविप्राणांमरणांतिकमिति कामकृतमहापापादौनतस्यनिष्कृतिरुक्ताभ्यग्निपतनाद्यत

रति विहितस्यविधानंउपदेशः एवंचपूर्वमतिपूर्वमनिर्देश्यंप्राणांतिकमितिस्थितिरितिमनुवाक्यमेतद्गुणविषयमेव
एकमूलकल्पनालाघवात् संसर्गदोषस्तेयान्यमहापातकिनिष्कृतिरिति त्यजेद्देशंकृतयुगत्रेतायांग्रामंमुत्सृजेत् द्वा
परेकुलमेकंतुकर्त्तारंतुकलौयुगइतिपराशरवचनेनसंलापादिनवविधसंसर्गाभावेपिविहितस्यदेशात्यादित्यागस्य
निषेधः यद्वा कृतेसंभाष्यपतित्रेतायांस्पर्शनेनतु द्वापरेत्वन्नमादायकलौकर्त्तवलिप्यतइत्यनेनसंभाषणस्पर्शनादि
जन्यपातित्यस्यैवनिषेधः नतुपतितेनसहसंवत्सरंनवविधसंसर्गप्राप्तस्यपातित्यस्य पूर्वोक्तवचनद्वयबाधमात्रेण
चरितार्थस्यनवविधसंसर्गनिषेधप्रतिपादकानेकवाक्यबाधस्यान्याय्यत्वात् कलौपतितकर्मणीतिवाक्यस्वारस्यान
पतितसंसर्गरूपकर्मजन्यस्यपातित्यस्यदुर्निवारत्वाच्च अतश्चेदानीतनानासंसर्गेप्रायश्चित्तानुष्ठानाचारःस्वाचा
रएव स्तेयान्यमहापातकेषुनिष्कृतिःरहस्यप्रायश्चित्तंनिषिध्यते अत्रकेचित् स्तेयान्यमहापातकेप्रायश्चित्तमेव
कालेनभवतीतिप्राहुः द्वापरेशंखलीखिताःकलौपाराशराःस्मृताइत्यनेनान्यस्मृतिविरोधेविकल्पप्रसक्तोस्मृत्यं

राम
१०२

त्तरीयविशेषशास्त्रेणबाधप्रसक्तौपराशरस्मृतेःकलौबलीयस्त्वनियमेनस्तेयान्येत्यस्याबाधात् नचबाधेविषयांतरासं
भवादप्रमाण्यापत्तिः औदुंबरीस्रक्ष्वाङ्गायेतिश्रुत्याबाधितायाश्चौदुंबरीसर्वावेष्टयितव्येतिस्मृतेर्ह्यङ्गुल्यानिमु
क्तासर्वावेष्टयितव्येतिन्यायसुधाकारोक्ततात्पर्यकल्पनवदिहापिस्तेयान्यमहापातकनिष्कृतिनापदेश्या कृतायाम
पिनिष्कृतौसंसर्गानुकर्त्तव्यतितात्पर्यकल्पनात् वस्तुतस्तुमनुवाक्येनोपदेशनिषेधस्यसिद्धित्वात्ब्राह्मणभोजनविधि
विरोधाच्च रहस्यप्रायश्चित्तंनिष्कृतिर्नभवतीतिकल्प्यं अतएवतत्रतत्ररहस्यप्रायश्चित्तंनिर्दिष्टं तस्मात्सकाशयेत्यापमि
त्यादिचोक्तं नचैवंस्तेयपर्युदासोऽसंगतः तस्याकलावनायासेनस्तेयनिष्पत्त्याप्रतिनिमित्तमुपदेशासंभवेनरहस्यप्रा
यश्चित्ताभ्यनुज्ञानार्थत्वात् वातिथिपितृभ्यश्चपशूपाकरणक्रियेति यत्रस्यप्राप्तापत्योतिथिपितृयज्ञवैश्वदेवत्यागे
विधिः वाध्रीणसस्यमांसेनतृप्तिर्द्वादशवार्षिकीत्यादिवचनकदंबकेनत्रिष्वपिप्राप्तिः अत्रश्राद्धेपशुयागाभावेन
तदर्थमानतिदेशादुपाकरणाप्राप्तेःपशूपाकरणशब्दलक्षितंतत्सकृतिकंपितृयोमांसदानंनिषीध्यते तथाच

आद्देमांसनिषद्देनैकमूलत्वान्नकल्पनागौरवं तथा दत्तौरसेतरेषांतुपुत्रत्वेनपरिग्रहः सर्वेष्वन्यांगनाङ्गुष्टसंसर्गशोधितेरपि
सवर्णेत्वाअसवर्णेषाभ्रंगनास्वामिङ्गुष्टैस्तत्संस्पृष्टैःकृतप्रायश्चित्तैरपिसंसर्गःइदंचोत्तमवर्णविषयमेवेतिपक्षमुत्पश्यामः
तथा भ्रयोनोसंभ्रेरत्नेपरित्यागोगुरुस्त्रियाइति चतस्वरूपरित्याज्याःशिष्यगागुरुगाचर्या पतिभ्रांचविशेषेणजंगि
तोपगताचर्येत्यादिनाविहितः भ्रनेनयुगांतरेभ्रयोमोसंसर्गपरित्यागइतिगम्यते तथा परोहृत्यात्मत्यागउच्छिष्टस्याप
वर्जनं गवार्थेब्राह्मणार्थेवासद्यःप्राणान्परित्यजेदितिविहितः स्वमुच्छिष्टमुच्छिष्टोपस्तंचेतिवसिष्ठोक्तनिमित्तं प्राय
श्चित्तंचेतिकेचित् विश्राणनंवितरणंस्पर्शनप्रतिपादनं प्रादेशनंनिवेपणमपवर्जनमेहतिरितिन्त्रिकांडीस्मरणात् भ्रप
वर्जनंदानं ब्राह्मणायोदगुच्छिष्टंप्रयच्छेदित्यादिनामकृपकादिविहितमितिम्रात्चरणाः प्रतिमाभ्यर्चनार्थायसंकल्पश्च
स्वधर्मकः स्यमेवप्रतिमायावद्वीवंमयाभ्रर्चनीयेत्येवमादिः। भ्रस्थिसंचयनाद्भ्रर्वाग्भ्रंगस्पर्शनमेवच शामित्रंचेवचि
त्राणांसोमविक्रयणंतथा शामित्रंयज्ञेस्वयमेवपश्वमारणं षड्रात्रानशनेनान्नेहरणंहीनकर्मणः षड्रात्रानशनमुपवा

सत्रयं भुक्त्वातस्मादहंस्थित्वाधान्यब्राह्मणाद्वरेदितिविहितं भूदेवुदासगोपालकुलमित्राईसीरिणां भोजान्नतारुस्तस्यतीर्थ
यात्रातिदूरतः गुरुस्तस्यारिहतात्रेरितिकेचित् तत्पाशिष्यस्यगुरुदारेषुगुरुवच्छरीरिता गुरुवत्प्रतिपूज्यात्कसवर्णगुरुर्योषित
इतिमनूक्तो तथा भ्रापद्यनिर्हिजाध्याणोभ्रश्वस्तनिकतातथा क्षात्रेणकर्मणाजीवेद्विशांयाप्यापरिहिंसइति भारिकोश्व
स्तनोपिचत्यक्तो तथा परार्थेतुर्हिजाध्याणाजातारणिपरिग्रहः ब्राह्मणानांप्रवासित्वंमुख्याग्निधमनक्रिया प्रवासशीलत्व
रुपात्तुनचिरंवसेदितिस्मरणादितिकेचित् बलात्कारादिदुष्टस्त्रीसंग्रहेविधिचोदितः यस्तेस्तसर्ववर्णेषुभिक्षाचर्यावि
धानतः नवोदकेतथाहंचदक्षिणाविधिचोदितेति दशरात्रेणभ्रर्धंतिभ्रमिषंचनवोदकमितिविहितं गुरवेवरंदत्वास्नो
पीतवदनुज्ञयेतिविहितंदक्षिणादानं तथाब्राह्मणादिषुभ्रूदस्यपचनादिक्रियतेपिच भ्रार्याधिष्ठितभ्रूद्राःसंस्कर्त्तारः
स्मरित्यापस्तंबविहिता तथा भग्वग्निपतनेभ्रैवहरुदारिमरणंतथा भ्रत्रमूले रुदःशौचस्यतेलुप्तःप्रत्याख्यातमिषि
क्रियारुद्रादिविज्ञानेश्वरस्यथादृष्टव्यं गोतन्निशिष्टेपयसिशिष्टैराचमनक्रिया पितापुत्रविरोधेचसाक्षिणांदंडकल्पनं

साक्षिणांचसमाधात्रणांच पितापुत्रविरोधेतुसाक्षिणांत्रिगुणोदमः अंतरेचयोर्यस्यात्तस्याप्यष्टगुणोदमइतिविहितं यत्रसायं गृहत्वंचमुनिभिस्तत्वदर्शिनः यत्रसायंकालोजातस्तत्रैवसन्यासीनामवस्थानं एतानिलोकगुरुस्पर्यंकालेरादौमहात्मभिः निवर्तितानिकर्माणिव्यवस्थापूर्वकंबुधैः समयश्चापिसाधूनांप्रमाणंवेदवद्भवेत् अत्रपुराणे दीर्घकालंब्रह्मचर्यधारणंचकमंडलोः गोत्रान्मातृसपिंडाच्चविवाहेगोवृषस्तथा नराश्वमेधोमद्यंचकलौवर्ज्यादिजातिभिः दीर्घकालमितिकालपरोपादानबलाद्दशवत्सरिणंहर्षाणिवदब्रह्मचर्यमितिश्रुत्यक्तं अन्यथादीर्घब्रह्मचर्यमित्येवावक्ष्यत् एतेनब्रह्मव्रतंनैष्ठिकमितिराभचंद्राचार्योक्तिःपरास्ता अतएवशविरानंनैष्ठिकब्रह्मचर्याचारःसंगच्छते कमंडलुधारणंव्याख्याते गोत्रात्रत्यनेनस्वगोत्रोत्पन्नायाःपितृष्वस्रः मातृसपिंडादित्यनेनमातुलगोत्रसापिंड्ययोःसामान्यनिषेधनेचप्राप्तस्याभावान्मातुलकन्यापरिणयनंनिषिध्यते तेनमातुलकन्यापरिणयनस्यनिषेधकानिवाक्यानिकलिविषयाण्येव अतएवाकृत्रिमानांतरादिपुनराचारएव कृष्णाजुनादिनातियुगांतरीयत्वात्सदाचारएव अतएवव्यासेनकलिनिरासप्रक्रमे तृतीयांमातृतःकन्यांत

तीयांपितृतस्तथा श्लोकेनाचोद्वहिष्यंतिविप्राःपापविमोहितारत्यक्तं बोधायनेनचमातुलपितृष्वसृदुहित्रगमनमितिदाक्षिणात्यानाचारपुरस्कृतं गोवधोमधुपर्कादौ नरमेधःब्रह्मणब्रह्मणमालभतइति मद्यंगौडीमाध्वीरूपंक्षत्रियवैश्ययोर्निषिध्यते तस्माद्ब्राह्मणराजन्यौवश्यैश्चसुरानपिबेदित्यनेनसुरायाद्विजात्यबलेदननिषेधस्यसिद्धत्वात् यद्वावामागमारौद्रवर्णिकादिपुरस्कारेणविनायकशांत्यादौक्षत्रियादिपुरस्कारेणोक्तंचनिषिध्यते क्रतुः देवराजसुतोत्पत्तिर्दत्तोकान्यानदीयते नयतेगोवधःकार्यकालोनचकमंडलुः विधवायांप्रजोत्पत्तेरित्यनेनसमानार्षकंपूर्वार्द्धं आदित्यपुराणे ऊढायांपुनरूढायांज्येष्ठांगोवधंतथाकलौपंचनकुर्वीतभ्रातृजायांकमंडलुं ज्येष्ठांशंविषमंविभागं भ्रातृजायांजायामितिशेषः दानधर्माद्योगरुपुराणे नकलौक्रियतेश्वमेधोवाष्यधगोसवः नरमेधोसतानारीदेवरात्पुत्रसंततिः गृहिसंसमकंयेतराजसूयकमंडलू श्रारद्दीपकलिकायां मूदनपारिजातेवनिगमः अस्तंतागोपश्चैवश्रारंमांसंतथामधु देवराजसुतोत्पत्तिःकलौपंचविवर्जयेत् यथावेदिर्बर्हिधर्माणांप्रधानसंबंधिमात्रांशेविधिर्नतुतादर्थ्यांशेप्रमाणाभावात्ततश्च श्राद्ध

मांसमित्यत्रश्राद्धसंबंधिकल्पेपुरुषार्थचनिषिध्यते अविशेषात् पंचेत्यत्रनपरिसंख्यादोषत्रयापत्तेः पूर्वोक्तानेकवाक्या
नर्थक्यापत्तेश्च अतःप्रदर्शनार्थमेतद्वचनोपात्तत्वोपाधिनाचपंचत्वोपपत्तिः आदित्यपुराणे शपथाकृतात्रश्राद्धसामु
द्रिकमुपश्रितिः उपयाचितमेतानिसंभवतिकलौक्वचित् तस्मात्तन्मात्रलाभेनकलौकार्यंनकारयेत् विश्वेरपरेतोव्यासः
चत्वार्यब्दसहस्राणिचत्वार्यब्दशतानिच कलेर्यदागमिष्यंतितदात्रेतापरिग्रहः संन्यासश्चनकर्तव्योव्यासेनविजानते
ति अत्रत्रेतापरिग्रहइतिवदतासर्वविधानमेवनिषिध्यते अतएवलोगाक्षिः अर्द्धविधानंस्मृतंश्रौतस्मार्त्तंश्रास्त्रकृत्य
कृतिः सर्वविधानंतयोरेकस्मृतिःपूर्वयुगाश्रितेति युगस्यपूर्वयुगपूर्वयुगकलेःपूर्वभागइत्यर्थः अर्द्धविधानमपि
यावद्दर्णवेदविभागंकार्यं तदाहदेवलः पादूर्णविभागोस्तियावद्वेदप्रवर्तते संन्यासंवाग्निहोत्रंचतावत्कुर्यात्कलौ
युगइति यद्यपिसन्यासस्यचतुश्चत्वारिंशत्ताब्दावधिकत्वव्यासेनोक्तं तथापिगणकालोनेनसमर्थतरतिके
चित् त्रिदंडैकदंडिनिप्रायेणव्यवस्थेत्यपरे सामान्यतोनिषिद्धस्यन्यासवाक्येनापसंहारइत्यन्ये वस्तुतस्तुचत्वार्य

राम
१०५

पीत्यादीनिवचनानिमहानिबंधेपुनरुदंते इतिकलिवर्ज्यनिर्णयः इतिश्रीमीमांसकशेखरभट्टात्मजभट्टनील
कंठेनकृतेभास्कराख्यनिबंधेसमयमयूखः समाप्तिमगमत्तृतीयोयंमयूखः शके१६९१ दुर्मत्यब्देभाद्रसितपौर्णे
मास्यांरचोनारायणदैवज्ञेनलिखितं श्रीमल्लक्ष्मीकेशवार्पणमस्तु ७

७ ७ ७ ७ ७ ७ ७ ७ ७

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

समयसारवैभवः समाप्तिमितीयत्तया ३